वसुदेवसुतं देवं कंसचाणूरमर्दनम्।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ १॥

अतसीपुष्पसङ्काशं हारनूपुरशोभितम्।
रत्नकङ्कणकेयूरं कृष्णं वन्दे जगद्गुरुम् ॥ २॥

कुटिलालकसंयुक्तं पूर्णचन्द्रनिभाननम्।
विलसत्कुण्डलधरं कृष्णं वन्दे जगद्गुरुम् ॥ ३॥

मन्दारगन्धसंयुक्तं चारुहासं चतुर्भुजम्।
बर्हिपिञ्छावचूडाङ्गं कृष्णं वन्दे जगद्गुरुम् ॥ ४॥

उत्फुल्लपद्मपत्राक्षं नीलजीमूतसन्निभम्।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥ ५॥

रुक्मिणीकेलिसंयुक्तं पीताम्बरसुशोभितम्।
अवाप्ततुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् ॥ ६॥

गोपिकानां कुचद्वन्द्वकुङ्कुमाङ्कितवक्षसम्
श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ॥ ७॥

श्रीवत्साङ्कं महोरस्कं वनमालाविराजितम्।
शङ्खचक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् ॥ ८॥

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ॥

॥ इति कृष्णाष्टकम् ॥

अर्थः -

**वसुदेवसुतं देवं कंसचाणूरमर्दनम्।**
**देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ १॥**

**वसुदेवसुतं** वसुदेवस्य पुत्रः यः तम्, देवं यः देवः तम्, **कंसचाणूरमर्दनम्** कंसः चाणूरः च येन मारितौ तम्

**देवकीपरमानन्दं** यः देवक्याः परमानन्दस्य कारणम् अस्ति तम्,

**कृष्णं** कृष्णः तम्, **वन्दे** अहं नमामि **जगद्गुरुम्** यः जगतः गुरुः अस्ति तम्

अतसीपुष्पसङ्काशं हारनूपुरशोभितम्।
रत्नकङ्कणकेयूरं कृष्णं वन्दे जगद्गुरुम् ॥ २॥

अतसीपुष्पसङ्काशं आतसीपुष्पेण (पुष्प विशेषः) सङ्काशं (सदृशः), हारनूपुरशोभितम् हारेण (माला) नूपुरेण (पादभूषणम्) शोभितः(अलंकृतः) यः तम्

रत्नकङ्कणकेयूरं रत्नेन कङ्कणाभ्याम् केयूराभ्याम् (बाहुभूषणं) शोभितः(अलंकृतः) यः तम्

कृष्णं कृष्णः तम्, वन्दे अहं नमामि **जगद्गुरुम्** यः जगतः गुरुः अस्ति तम्

**कुटिलालकसंयुक्तं पूर्णचन्द्रनिभाननम्।**

**विलसत्कुण्डलधरं कृष्णं वन्दे जगद्गुरुम् ॥ ३॥**

कुटिलालकसंयुक्तं कुटिलालक (ललाटे वक्र केशाः) संयुक्तं यस्य तम्

पूर्णचन्द्रनिभाननम् पूर्णचन्द्र निभ (सदृशः)आननं ( मुखं) यस्य तम्

विलसत्कुण्डलधरं विलसत् (प्रकाशमानः) कुण्डले धृते येन तम्,

कृष्णं वन्दे जगद्गुरुम् कृष्णं कृष्णः तम्, वन्दे अहं नमामि जगद्गुरुम् यः जगतः गुरुः अस्ति तम्

**मन्दारगन्धसंयुक्तं चारुहासं चतुर्भुजम्।**
**बर्हिपिञ्छावचूडाङ्गं कृष्णं वन्दे जगद्गुरुम् ॥ ४॥**

मन्दारगन्धसंयुक्तं मन्दारेण(पुष्प विशेषः) गन्धेन (सुरभि) संयुक्तं यः तम्

चारुहासं चारु (मनोरमम्) हासं (हासः) यस्य तम् चतुर्भुजम् चतुर् (चत्वारः) भुजाः यस्य तम्

बर्हिपिञ्छावचूडाङ्गं बर्हि (मयूर पिञ्च) चूडाङ्गं (शिरोपरि) यः धरति तम्

कृष्णं वन्दे जगद्गुरुम् कृष्णं कृष्णः तम् वन्दे अहं नमामि जगद्गुरुम् यः जगतः गुरुः अस्ति तम्

**उत्फुल्लपद्मपत्राक्षं नीलजीमूतसन्निभम्।**

**यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥ ५॥**

उत्फुल्लपद्मपत्राक्षं उत्फुल्ल(विकसित) पद्मपत्राक्षं पद्मपत्रसदृशे नेत्रे यस्य तम्

नीलजीमूतसन्निभम् नीलजीमूत (नील मेघः) सन्निभम् (सदृशः )

यादवानां शिरोरत्नं (चूडामणि, सर्वोत्तमः) तम्

कृष्णं वन्दे जगद्गुरुम् कृष्णं कृष्णः तम् वन्दे अहं नमामि जगद्गुरुम् यः जगतः गुरुः अस्ति तम्

**रुक्मिणीकेलिसंयुक्तं पीताम्बरसुशोभितम्।**
**अवाप्ततुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् ॥ ६॥**

रुक्मिणीकेलि रुक्मिण्या सह क्रीडा \ लीला संयुक्तं,
पीताम्बरसुशोभितम् (पीत कौशेय वाससा) शोभितं(अलंकृतः) यः तम्

अवाप्ततुलसीगन्धं अवाप्त (प्राप्त) तुलसीगन्धं

कृष्णं वन्दे जगद्गुरुम् कृष्णं कृष्णः तम् वन्दे अहं नमामि जगद्गुरुम् यः जगतः गुरुः अस्ति तम्

**गोपिकानां कुचद्वन्द्वकुङ्कुमाङ्कितवक्षसम्**
**श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ॥ ७॥**

गोपिकानां कुचद्वन्द्वकुङ्कुमाङ्कितवक्षसम् (गोपिकाभिःआलिङगनेन उरसि कुङ्कुम् लेपितं यस्य) तम् श्रीनिकेतं श्रीदेवी यस्मिन् निवसति तम् महेष्वासं महान् धनुर्धारी यः तम्

**श्रीवत्साङ्कं महोरस्कं वनमालाविराजितम्।**
**शङ्खचक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् ॥ ८॥**

श्रीवत्साङ्कं श्रीवत्सः(श्रीयुक्तं वक्षस्थले) अङ्कश्चिह्नं यस्य तम्

महोरस्कं महत् वक्षस्थलं यस्य तम्

वनमाला (वनोद्भवपुष्परचिता माला) विराजितम् (शोभितः) यः तम्

शङ्खचक्रधरं शङ्खः चक्रं च धृतौ येन तम्

देवं यः देवः तम् कृष्णं वन्दे जगद्गुरुम् कृष्णं कृष्णः तम् वन्दे अहं नमामि जगद्गुरुम् यः जगतः गुरुः अस्ति तम्

**कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।**
**कोटिजन्मकृतं पापं स्मरणेन विनश्यति ॥**

कृष्णाष्टकमिदं इदं कृष्णाष्टकम् प्रातरुत्थाय प्रातः उत्थाय यः नरः पठति सःपुण्यं प्राप्नोति
(अपि च एतस्य स्तोत्रस्य मात्र) स्मरणेन कोटिजन्मनि कृतं पापं विनश्यति||
॥ इति कृष्णाष्टकम् ॥

***अर्थसहितं स्तोत्रम्*** -

वसुदेवसुतं देवं कंसचाणूरमर्दनम्।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ १॥

**वसुदेवसुतं** = यः वसुदेवस्य पुत्रः,तम्। देवं **कंसचाणूरमर्दनम्**=यः कंसस्य, चाणूरस्य च संहारं कृतवान् ; तम् । **देवकीपरमानन्दं** = देवक्याः परमः आनन्दः, तम्

अतसीपुष्पसङ्काशं हारनूपुरशोभितम्।
रत्नकङ्कणकेयूरं कृष्णं वन्दे जगद्गुरुम् ॥ २॥

अतसीपुष्पम् - नीलवर्णमयः पुष्पविशेषः । सङ्काशः - सदृशः ।
हारनूपुरशोभित - हारः च नूपुरः च हारनूपुरौ । हारनूपुरेण शोभितः, तम् ।
रत्नकङ्कणकेयूरः - रत्नयुक्तं कङ्कणं, केयूरं च यस्य सः, तम् ।

कुटिलालकसंयुक्तं पूर्णचन्द्रनिभाननम्।
विलसत्कुण्डलधरं कृष्णं वन्दे जगद्गुरुम् ॥ ३॥

अलकाः = केशाः, कुटिलैः अलकैः संयुक्तः, तम् ।
पूर्णचन्द्रः सदृशः (निभः) आननं (मुख) यस्य सः, तम् ।
विलसन्ति = प्रकाशन्ते । विलसन्ति कुण्डलानि (कर्णाभरणानि) = विलसत्कुण्डलानि ।
विलसत्कुण्डलानां धरः (धरति इति धरः), तम् ।

मन्दारगन्धसंयुक्तं चारुहासं चतुर्भुजम्।
बर्हिपिञ्छावचूडाङ्गं कृष्णं वन्दे जगद्गुरुम् ॥ ४॥

मन्दारपुष्पस्य गन्धेन संयुक्तः, तम् ।

चारुः = मनोहरः, हासः = हसनम्, स्मितम् । चारुः हासः यस्य सः ।
चतुर्भुजः = चत्वारः भुजाः यस्य सः ।
बर्ही = मयूरः । पिञ्छम् = पिच्छम् । मयूरस्य पिच्छं शिरसि यस्य सः ।

उत्फुल्लपद्मपत्राक्षं नीलजीमूतसन्निभम्।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥ ५॥

प्रफुल्लितपद्मस्य पत्रम् इव अक्षिणी यस्य सः ।
जीमूतः = मेघः । नीलमेघः इव ।

रुक्मिणीकेलिसंयुक्तं पीताम्बरसुशोभितम्।
अवाप्ततुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् ॥ ६॥
केलिः = क्रीडा । रुक्मिण्या सह क्रीडति/ क्रीडया संयुक्तः, तम् ।
पीताम्बरेण = पीतवस्त्रेण सुशोभितः, तम् ।
अवाप्तः = यं तुलस्याः गन्धः प्राप्तः, सः अवाप्ततुलसीगन्धः, तम् ।

गोपिकानां कुचद्वन्द्वकुङ्कुमाङ्कितवक्षसम्
श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ॥ ७॥

गोपिकानां कुङ्कुमं वक्षस्थले अङ्कितं यस्य सः ।
श्रीः = लक्ष्मीः । लक्ष्म्याः वासः यस्मिन् सः ।
इषुः = बाणः । इषोः वासः = धनुः । महान् इष्वासः (महत् धनु) यस्य सः ।

श्रीवत्साङ्कं महोरस्कं वनमालाविराजितम्।
शङ्खचक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् ॥ ८॥

श्रीवत्सः = विष्णुचिह्नविशेषः । तेन अङ्कितः ।
महत् उरः (वक्षस्थलम्) यस्य सः ।
वनमाला = श्रीकृष्णस्य माला । वनोद्भवपुष्पैः रचिता माला इत्यर्थः । तेन विराजितः = सुशोभितः ।
शङ्खं चक्रं च = शङ्खचक्रे । तयोः धरः (धरति इत्यर्थः) ।

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ॥

॥ इति कृष्णाष्टकम् ॥